श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ द्विचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विचत्वारिंशः सर्गः ॥

## लङ्कां प्रति वानराणामाक्रमणं राक्षसैः सह सङ्ग्रामश्च

ततस्ते राक्षसास्तत्र गत्वा रावणमन्दिरम्।
न्यवेदयन् पुरीं रुद्धां रामेण सह वानरैः ॥ **6.42.1** ॥

रुद्धां तु नगरीं श्रुत्वा जातक्रोधो निशाचरः।
विधानं द्विगुणं कृत्वा प्रासादं चाप्यरोहत ॥ **6.42.2** ॥

स ददर्श वृतां लङ्कां सशैलवनकाननाम्।
असङ्ख्येयैर्हरिगणैः सर्वतो युद्धकाङ्क्षिभिः ॥ **6.42.3** ॥

स दृष्ट्वा वानरैः सर्वैर्वसुधां कपिलीकृताम्।
कथं क्षपयितव्याः स्युरिति चिन्तापरोऽभवत् ॥ **6.42.4** ॥

स चिन्तयित्वा सुचिरं धैर्यमालम्ब्य रावणः।
राघवं हरियूथांश्च ददर्शायतलोचनः ॥ **6.42.5** ॥

राघवः सह सैन्येन मुदितो नाम पुप्लुवे।
लङ्कां ददर्श गुप्तां वै सर्वतो राक्षसैर्वृताम् ॥ **6.42.6** ॥

दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम्।
जगाम सहसा सीतां दूयमानेन चेतसा ॥ **6.42.7** ॥

अत्र सा मृगशावाक्षी मत्कृते जनकात्मजा।
पीड्यते शोकसन्तप्ता कृशा स्थण्डिलशायिनी ॥ **6.42.8** ॥

निपीड्यमानां धर्मात्मा वैदेहीमनुचिन्तयन्।
क्षिप्रमाज्ञापयद् रामो वानरान् द्विषतां वधे ॥ **6.42.9** ॥

एवमुक्ते तु वचसि रामेणाक्लिष्टकर्मणा।
सङ्घर्षमाणाः प्लवगाः सिंहनादैरनादयन् ॥ **6.42.10** ॥

शिखरैर्विकिरामैतां लङ्कां मुष्टिभिरेव वा।
इति स्म दधिरे सर्वे मनांसि हरियूथपाः ॥ **6.42.11** ॥

उद्यम्य गिरिशृङ्गाणि महान्ति शिखराणि च।
तरूंश्चोत्पाट्य विविधांस्तिष्ठन्ति हरियूथपाः ॥ **6.42.12** ॥

प्रेक्षतो राक्षसेन्द्रस्य तान्यनीकानि भागशः।
राघवप्रियकामार्थं लङ्कामारुरुहुस्तदा ॥ **6.42.13** ॥

ते ताम्रवक्त्रा हेमाभा रामार्थे त्यक्तजीविताः।
लङ्कामेवाभ्यवर्तन्त सालभूधरयोधिनः ॥ **6.42.14** ॥

ते द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवङ्गमाः।
प्राकाराग्राण्यसङ्ख्यानि ममन्थुस्तोरणानि च ॥ **6.42.15** ॥

परिखान् पूरयन्तश्च प्रसन्नसलिलाशयान्।
पांसुभिः पर्वताग्रैश्च तृणैः काष्ठैश्च वानराः ॥ **6.42.16** ॥

ततः सहस्रयूथाश्च कोटियूथाश्च यूथपाः।
कोटियूथशताश्चान्ये लङ्कामारुरुहुस्तदा ॥ **6.42.17** ॥

काञ्चनानि प्रमर्दन्तस्तोरणानि प्लवङ्गमाः।
कैलासशिखराग्राणि गोपुराणि प्रमथ्य च ॥ **6.42.18** ॥

आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः।
लङ्कां तामभिधावन्ति महावारणसन्निभाः॥ **6.42.19** ॥

जयत्युरुबलो रामो लक्ष्मणश्च महाबलः।
राजा जयति सुग्रीवो राघवेणाभिपालितः॥ **6.42.20** ॥

इत्येवं घोषयन्तश्च गर्जन्तश्च प्लवङ्गमाः।
अभ्यधावन्त लङ्कायाः प्राकारं कामरूपिणः॥ **6.42.21** ॥

वीरबाहुः सुबाहुश्च नलश्च पनसस्तथा।
निपीड्योपनिविष्टास्ते प्राकारं हरियूथपाः।
एतस्मिन्नन्तरे चक्रुः स्कन्धावारनिवेशनम्॥ **6.42.22** ॥

पूर्वद्वारं तु कुमुदः कोटिभिर्दशभिर्वृतः।
आवृत्य बलवांस्तस्थौ हरिभिर्जितकाशिभिः॥ **6.42.23** ॥

सहायार्थे तु तस्यैव निविष्टः प्रघसो हरिः।
पनसश्च महाबाहुर्वानरैरभिसंवृतः॥ **6.42.24** ॥

दक्षिणद्वारमासाद्य वीरः शतबलिः कपिः।
आवृत्य बलवांस्तस्थौ विंशत्या कोटिभिर्वृतः॥ **6.42.25** ॥

सुषेणः पश्चिमद्वारं गत्वा तारापिता बली।
आवृत्य बलवांस्तस्थौ कोटिकोटिभिरावृतः॥ **6.42.26** ॥

उत्तरद्वारमागम्य रामः सौमित्रिणा सह।
आवृत्य बलवांस्तस्थौ सुग्रीवश्च हरीश्वरः॥ **6.42.27** ॥

गोलाङ्गूलो महाकायो गवाक्षो भीमदर्शनः।
वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः॥ **6.42.28** ॥

ऋक्षाणां भीमकोपानां धूम्रः शत्रुनिबर्हणः।
वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः ॥ **6.42.29** ॥

सन्नद्धस्तु महावीर्यो गदापाणिर्विभीषणः।
वृतो यत्तैस्तु सचिवैस्तस्थौ यत्र महाबलः ॥ **6.42.30** ॥

गजो गवाक्षो गवयः शरभो गन्धमादनः।
समन्तात् परिधावन्तो ररक्षुर्हरिवाहिनीम् ॥ **6.42.31** ॥

ततः कोपपरीतात्मा रावणो राक्षसेश्वरः।
निर्याणं सर्वसैन्यानां द्रुतमाज्ञापयत् तदा ॥ **6.42.32** ॥

एतच्छ्रुत्वा तदा वाक्यं रावणस्य मुखेरितम्।
सहसा भीमनिर्घोषमुद्घुष्टं रजनीचरैः ॥ **6.42.33** ॥

ततः प्रबोधिता भेर्यश्चन्द्रपाण्डुरपुष्कराः।
हेमकोणैरभिहता राक्षसानां समन्ततः ॥ **6.42.34** ॥

विनेदुश्च महाघोषाः शङ्खाः शतसहस्रशः।
राक्षसानां सुघोराणां मुखमारुतपूरिताः ॥ **6.42.35** ॥

ते बभुः शुभनीलाङ्गाः सशङ्खा रजनीचराः।
विद्युन्मण्डलसन्नद्धाः सबलाका इवाम्बुदाः ॥ **6.42.36** ॥

निष्पतन्ति ततः सैन्या हृष्टा रावणचोदिताः।
समये पूर्यमाणस्य वेगा इव महोदधेः ॥ **6.42.37** ॥

ततो वानरसैन्येन मुक्तो नादः समन्ततः।
मलयः पूरितो येन ससानुप्रस्थकन्दरः ॥ **6.42.38** ॥

शङ्खदुन्दुभिनिर्घोषः सिंहनादस्तरस्विनाम्।
पृथिवीं चान्तरिक्षं च सागरं चाभ्यनादयत् ॥ **6.42.39** ॥

गजानां बृंहितैः सार्धं हयानां ह्रेषितैरपि।
रथानां नेमिनिर्घोषै रक्षसां वदनस्वनैः॥ **6.42.40** ॥

एतस्मिन्नन्तरे घोरः सङ्ग्रामः समपद्यत।
रक्षसां वानराणां च यथा देवासुरे पुरा॥ **6.42.41** ॥

ते गदाभिः प्रदीप्ताभिः शक्तिशूलपरश्वधैः।
निजघ्नुर्वानरान् सर्वान् कथयन्तः स्वविक्रमान्॥ **6.42.42** ॥

तथा वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः।
निजघ्नुस्तानि रक्षांसि नखैर्दन्तैश्च वेगिनः॥ **6.42.43** ॥

राजा जयति सुग्रीव इति शब्दो महानभूत्।
राजञ्जयजयेत्युक्त्वा स्वस्वनामकथां ततः॥ **6.42.44** ॥

राक्षसास्त्वपरे भीमाः प्राकारस्था महीं गतान्।
वानरान् भिन्दिपालैश्च शूलैश्चैव व्यदारयन्॥ **6.42.45** ॥

वानराश्चापि सङ्क्रुद्धाः प्राकारस्थान् महीं गताः।
राक्षसान् पातयामासुः खमाप्लुत्य स्वबाहुभिः॥ **6.42.46** ॥

स सम्प्रहारस्तुमुलो मांसशोणितकर्दमः।
रक्षसां वानराणां च सम्बभूवाद्भुतोपमः॥ **6.42.47** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विचत्वारिंशः सर्गः॥